# Shri Tripurasundari Stotram

# શ્રીત્રિપુરસુન્દરીસ્તોત્રમ્

## Document Information

Text title : Shri Tripurasundari Stotram 08 05

File name : tripurasundarIstotram.itx

Category : devii, devI, stotra, dashamahAvidyA

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-05

Latest update : August 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2021

*sanskritdocuments.org*

# શ્રીત્રિપુરસુન્દરીસ્તોત્રમ્

શ્વેતપદ્માસનારૂઢાં શુદ્ધસ્ફટિકસન્નિભામ્ ।
વન્દે વાગ્દેવતાં ધ્યાત્વા દેવીં ત્રિપુરસુન્દરીમ્ ॥ ૧॥

શૈલાધિરાજતનયાં શઙ્કરપ્રિયવલ્લભામ્ ।
તરુણેન્દુનિભાં વન્દે દેવીં ત્રિપુરસુન્દરીમ્ ॥ ૨॥

સર્વભૂતમનોરમ્યાં સર્વભૂતેષુ સંસ્થિતામ્ ।
સર્વસમ્પત્કરીં વન્દે દેવીં ત્રિપુરસુન્દરીમ્ ॥ ૩॥

પદ્માલયાં પદ્મહસ્તાં પદ્મસમ્ભવસેવિતામ્ ।
પદ્મરાગનિભાં વન્દે દેવી ત્રિપુરસુન્દરીમ્ ॥ ૪॥

પઞ્ચબાણધનુર્બાણપાશાઙ્કુશધરાં શુભામ્ ।
પઞ્ચબ્રહ્મમયીં વન્દે દેવીં ત્રિપુરસુન્દરીમ્ ॥ ૫॥

ષટ્પુણ્ડરીકનિલયાં ષડાનનસુતામિમામ્ ।
ષટ્કોણાન્તઃસ્થિતાં વન્દે દેવીં ત્રિપુરસુન્દરીમ્ ॥ ૬॥

હરાર્ધભાગનિલયામમ્બામદ્રિસુતાં મૃડામ્ ।
હરિપ્રિયાનુજાં વન્દે દેવીં ત્રિપુરસુન્દરીમ્ ॥ ૭॥

અષ્ટૈશ્વર્યપ્રદામમ્બામષ્ટદિક્પાલસેવિતામ્ ।
અષ્ટમૂર્તિમયીં વન્દે દેવીં ત્રિપુરસુન્દરીમ્ ॥ ૮॥

નવમાણિક્યમકુટાં નવનાથસુપૂજિતામ્ ।
નવયૌવનશોભાઢ્યાં વન્દે ત્રિપુરસુન્દરીમ્ ॥ ૯॥

કાઞ્ચીવાસમનોરમ્યાં કાઞ્ચીદામવિભૂષિતામ્ ।
કાઞ્ચીપુરીશ્વરીં વન્દે દેવીં ત્રિપુરસુન્દરીમ્ ॥ ૧૦॥

ઇતિ શ્રીત્રિપુરસુન્દરીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Tripurasundari Stotram*

pdf was typeset on August 15, 2021

Please send corrections to *sanskrit@cheerful.com*